SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-4, (Oct-Dec) 2025

भारतीयज्ञानपरम्परायां विद्यमानानां कतिपयदर्शनकोषग्रन्थानामैतिह्यमनुशीलनञ्च

Rajib Mandal
Research Scholar, Dept. of Sanskrit Vyakarana
Central Sanskrit University
Janakpuri, New Delhi, India
Email: mandalrajib624@gmail.com

Abstract: कुश् धातोः घञ् अच् वा प्रत्ययकृते सति कोश इति शब्दः निष्पन्नो भवति। कोश इत्यनेन आच्छादनं शब्दार्थनिरुपणञ्चेति बोध्यते। संस्कृतशास्त्रजगति वैदिकसाहित्ये, काव्यसाहित्ये, व्याकरणशास्त्रे, दर्शनशास्त्रे, पुराणशास्त्रे, धर्मशास्त्रे च कोषशास्त्रस्य अवस्थानं प्राथम्येन सर्वत्र गृहीतं दृश्यते। इदमेव कोषशास्त्रं समग्रशास्त्रेषु विशिष्टरूपेण तथा शास्त्रशीर्षकरूपेण जगति सुष्ठु परिगण्यते। अभिधानमिति नाम्ना कोषः इत्यस्य बोधः भवति। पुनः कोषः इति नाम्ना शब्दानां किञ्चन अर्थबोधकज्ञानवर्धकशास्त्रमिति ज्ञायते। अध्ययनाध्यापनयोः क्षेत्रे तथा नानाप्रकारक-भाषाव्यवहारक्षेत्रे शास्त्रीयनानार्थबोधे च कोषग्रन्थानां महती भूमिका विद्यते अनुभूयते च। अनुसन्धानेऽपि कोषग्रन्थस्य महत्त्वं सर्वैः स्वीकृतं दृश्यते। ज्ञानाधिगमप्रक्रियायां वेगमवाप्तुम्, आपाततः त्वरितं जिज्ञासितमर्थं ज्ञातुं, सन्दर्भं ज्ञातुं, शास्त्राणां नानाविधदिग्दर्शनार्थं च अनुसन्धित्सवः बहुधा कोषग्रन्थानामेव शरणमुपयान्ति आश्रयन्ति च। वेदाङ्गकालादारभ्य अद्य यावत् बहुविधाः नानाशैलीयुक्ताः विविधभाषोपनिबद्धाः भिन्नसम्प्रदायप्रेरिताः कोषग्रन्थाः बहुभिः प्रथितविद्वद्भिः स्वस्वसमये स्वस्वावश्यकतानुसारेण भिन्नभिन्नकालखण्डे भिन्नभिन्नस्थाने विरचिताः। तेषु कतिचन वैदिकाः, शास्त्रीयाः, दार्शनिकाः, वैयाकरणाः, पारिभाषिकाः वा पुनः कतिचित् तु शब्दार्थनिरूपणपराः सन्ति। आकारदृष्ट्या तथा प्रकारदृष्ट्या कोषग्रन्थानां विशालसागरः प्राप्यते। वेदे, व्याकरणे, काव्ये, दर्शने, पुराणे, धर्मशास्त्रे च शालान्तरवत् कोषग्रन्थानामपि भिन्नभिन्न-पण्डितैः भिन्नभिन्नप्रकारेण प्रणयनं दृश्यते। भारतीयज्ञानपरम्परां प्रति कोषग्रन्थानां महत्वपूर्णं योगदानं दृश्यते। विशेषतः दर्शनकोषेण दर्शनशास्त्रसम्बन्धितग्रन्थानां शास्त्रीयार्थसाधने, पारिभाषिकशब्दार्थसाधने, निगूढार्थबोधे, नानार्थज्ञापने, शिष्टव्याख्यानकृते, शब्दानां यथार्थप्रयोगे, शब्दानां नूतनशैली-प्रदर्शने च महत्वपूर्णं योगदानं परिलक्ष्यते। पुनः शास्त्रीयपद्धतिरक्षणार्थं, सर्वेक्षणपद्धतिरक्षणार्थं, समाजशास्त्रीयपद्धतिरक्षणार्थं, क्षेत्रीयाध्ययनपद्धति-रक्षणार्थं च कोषग्रन्थानां पूर्णतया आवश्यकता विद्यते।

Keywords: कोषः, दर्शनम्, दर्शनकोषः, दार्शनिकचिन्तनम्, भारतीयज्ञानपरम्परा।

भूमिका – संस्कृतकोषशास्त्रेतिहासपरम्परायां तथा संस्कृतकोषशास्त्रपरम्परायां च दर्शनकोषशास्त्रस्य परम्परा अतीव प्राचीना परम्परा इति कथ्यते। कोषशास्त्रस्य अवधारणविषये काव्यालंकारसूत्रवृत्तौ वामनाचार्येण प्रोक्तम्– "अभिधानकोषात्पदार्थनिश्चयः"(१/१)। बौद्धसाहित्ये कोशशब्दस्यार्थ-ज्ञापनार्थमुच्यते– "यत्र ग्रन्थानां संकलनं भवेत्"। हरिवंशपुराणेऽपि उच्यते– "मञ्जुषानिर्माणकर्ता"। कोषग्रन्थानां शास्त्रीयार्थज्ञापने 'अनेकार्थसंग्रहः' इति ग्रन्थे उच्यते—

"दर्शनं दर्पणे धर्मोपलब्ध्योर्बुद्धिशास्त्रयोः।
स्वप्नलोचनयोश्चापि दंशनं वर्म्मदंशयोः॥"[1]

पुनः सप्तदशशतके केशवाचार्येण कल्पद्रुकोष इति ग्रन्थस्य प्रारम्भे प्राचीनकोषकाराणां नामानि उल्लिखितानि—

"कात्यवाचस्पति-व्याडिभागूर्यमरमङ्गलाः ।
साहसाङ्कमहेशाद्या विजयन्ते जिनान्तिमाः॥"[2]

पुनः कोषग्रन्थादि विषये अन्यत्र दृश्यते—

"मेदिन्यमरमाला च त्रिकाण्डरत्नमालिका।
रन्तिदेवो भागुरिश्च व्याडि: शब्दार्णवस्तथा॥
विरूपश्च कलिङ्गश्च रभसः पुरुषोत्तमः।
दुर्गोजभिधानमाला च संसारवत्तशास्वतौ॥
विश्वो वोपालितश्चैव वाचस्पतिहलायुधौ।
हारावली साहसाङ्को विक्रमादित्य एव च॥
हेमचन्द्रश्च रुद्रश्चाप्यमरोजयं सनातनः।
एते कोशाः समाख्याताः संख्याः षड्विंशतिः स्मृताः॥"[3]

प्राचीनकाले कोषानामुत्पत्तिः वैदिकशब्दस्यार्थबोधनार्थमभवत्। यद्यपि वैदिककालस्य सर्वे कोषग्रन्थाः अधुना न प्राप्यन्ते। अतः यास्काचार्येण रचितः निघण्टु इति कोष: प्राचीनतमः कोषग्रन्थः अस्ति। अस्य निघण्टुग्रन्थस्य व्याख्यानं भवति निरुक्तम्। अत्र विषयमधिकृत्य सायणाचार्येण उक्तम् – 'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्'[4]। यथा वैदिकमन्त्राणाम् अर्थं ज्ञातुं शब्दकोषाः रचिताः, तथैव लौकिकसंस्कृतस्य शब्दावलीसमृद्ध्यर्थं एषः प्रकारः कोषः उद्भूतः। प्रो. कीथमहोदयः उक्तवान्– "..... in the case of the Nighaṇṭu literature the purpose was essentially interpretation of sacred texts which were becoming more and more obscure, while the Koṣas were prepared to help poets to a supply of words."[5]

वैदिककालः भारतीयसंस्कृतेः आदिकालः इति प्रसिद्धः। वैदिककालानन्तरं उपनिषद्-कालः आगतः, यः दार्शनिकचिन्तनस्य मूलं भवति। उपनिषद्-दर्शनं वैदिकविचारस्य पराकाष्ठा अस्ति —

आत्मा, ब्रह्म, मोक्ष, कर्म, पुनर्जन्म इत्यादयः प्रमुखविषयाः।

"अहं ब्रह्मास्मि", "तत्त्वमसि", "सर्वं खल्विदं ब्रह्म" इत्यादिमहावाक्यानि एषां दार्शनिकपरम्परायाः हृदयम्। भारतवर्षे दार्शनिकपरम्परा अपि वैदिककालानन्तरमेव आरभ्यते। वेदानामवस्थानं समग्रशास्त्रेषु अन्यतममिति तेनैव दर्शनस्य अवस्थानमपि सर्वत्र गृहीतं दृश्यते। जीवजगतोः रहस्यम् आरण्यक-ब्राह्मण -उपनिषत्-ग्रन्थेषु प्रकाशितं भवति। "आत्मा", "ब्रह्मः", "लोकः", "बन्धः", "मोक्षः", "मोक्षसाधनम्" इत्यादयः विषयाः उपनिषत्सु पुनः पुनः उल्लिखिताः सन्ति, तथा च एतासां अवधारणानां विषये भारतीयप्रज्ञायाः उड्डयनम् अद्यापि जगतः कृते अज्ञातम् अस्ति। कालान्तरे वैदिकपरम्परायाः आधारेण षट् (६) भारतीयदार्शनिकशाखाः विकसिताः—

सांख्यदर्शनम् — कपिलमुनिना प्रवर्तितम्, पुरुष-प्रकृतिवादः।
योगदर्शनम् — पतञ्जलिमुनिना रचितम्, चित्तवृत्तिनिरोधः मुख्यलक्ष्यम्।
न्यायदर्शनम् — गौतमेन प्रणीतम्, तर्कशास्त्राधारितम्।

वैशेषिकदर्शनम् — कणादेन विरचितम्, द्रव्यगुणादिविचारः।

पूर्वमीमांसादर्शनम् — जैमिनिना रचितम्, कर्मकाण्डप्रधानम्।

उत्तरमीमांसादर्शनम् (वेदान्तः) — बादरायणेन रचितं, ब्रह्मज्ञानप्रधानम्।

एतेषां अतिरिक्तं भारतीयदार्शनिकपरम्परायां चार्वाक-जैन-बौद्ध-दार्शनिकानामपि महत्त्वपूर्णं स्थानं परिलक्ष्यते। अतः कालान्तरे कोषग्रन्थानामुद्भवः जातः। दर्शनस्याभिधानपरम्परायां कतिपयप्रमुखाः ग्रन्थाः विद्यन्ते–

i. दर्शनकोश - डाँ. अमरनाथ-कपुर:, & विश्व-प्रकाश-गुप्त: & मोहिनी-गुप्त:, राधाप्रकाशनम्, नवदेहली, २००४.
ii. भारतीय दर्शन कोष - (प्रथम भाग, द्वितीय भाग) श्री श्रीमोहन-भट्टाचार्यः & श्रीदीनेश-भट्टाचार्यः, संस्कृतमहाविद्यालयः, कोलकाता, 1958, 1979.
iii. भारतीय दर्शन परिभाषा कोश - डाँ. दीनानाथ-शुक्लः, प्रतिभाप्रकाशनम्, दिल्ली, १९९३.
iv. भारतीय-दर्शन-बृहत्कोश - (भाग-१,२,३,४,५,६,७) बच्चुलाल-अवस्थी (रचयिता) & डाँ. बालकृष्ण-शर्मा, शारदाप्रकाशनगृहम्, दिल्ली, 1997.
v. योग कोश (प्रथम खण्ड), (द्वितीय खण्ड) - श्रीचन्द्र-चोरडिया, न्यायतीर्थः, जैन-दर्शन- समितिः , कोलकाता, सन् १६६३, सन् १९९६.
vi. जैन पारिभाषिक शब्दकोश - सागर-चन्द्रप्रभः, प्राकृत-भारती-अकादमी, जयपुरम्, 1990.
vii. दार्शनिक सम्प्रत्यय-कोश - शशिप्रभा-कुमारः & सन्दोष-कुमार-शुक्लः & राम-नाथ-झा, विशिष्ट-संस्कृत-अध्ययन-केन्द्रः, जवहरलाल-नेहेरू-विश्वविद्यालयः, नवदेहली, 2014.
viii. योग-उपनिषद्-कोश - सुभाष-विद्यालंकार:, प्रतिभाप्रकाशनम्, देहली, 2021.
ix. योग-शब्दकोश - सुभाष-विद्यालंकार:, प्रतिभाप्रकाशनम्, देहली, 2011.
x. जैनेन्द्र सिद्धान्त कोश [Vol-1 (अ-औ), Vol-2 (क-न), Vol-3 (प-व), Vol-4 (श-ह), Vol-5 (शब्दानुक्रमणिका)] - क्षु. जैनेन्द्र-वर्णी, भारतीय-ज्ञानपीठम्, नवदेहली, 2018, 2002,2002,2003,2009 (क्रमानुसारेण प्रकाशितम्।)
xi. सांख्ययोगकोश: - आचार्य-केदारनाथ-त्रिपाठी, काशी-हिन्दु-विश्वविद्यालयः, वाराणसी, 1974.
xii. मीमांसाकोषः (भाग: - १,२,३,४,५,६,७) - केवलानन्द-सरस्वती, प्राज्ञपाठशालामण्डलः, महाराष्ट्रः, १९९६.
xiii. शाङ्करवेदान्तकोश: - डाँ. मुरलीधर-पाण्डेयः, सम्पूर्णनन्दविश्वविद्यालयः, वाराणसी, १९९८.
xiv. मीमांसा-उद्धरण-कोशः - श्री धन्नालाल-जवाहरलाल-अग्रवाल:, Vaidika Saṁśodhana Maṇḍala, Pune, 1906.
xv. योग-सूत्र-भाष्य-कोष: - भगवद्-दासः, The Kashi Vidyapitha, Benaras, 1938.
xvi. भारतीयदर्शन-कोश - डाँ. सन्तोष-आचार्यः, Vagvedi Parkashan, Bikaner, Rajasthan, 2005.
xvii. दर्शन-परिभाषा-कोश - डाँ. गोवर्धन-भट्ट: & हरबंशलाल शर्मा, Commission For Scientific & Technical Terminology, 1999.
xviii. जैनदर्शन-परिभाषा-कोश - मुनिक्षमासागरः, Commission For Scientific & Tech-

nical Terminology, 2004.

xix. न्यायकोशः - M. M. Agrawal, Chaukhamba Surbharati Prakashan, Varanasi, 2017.

xx. Nyāyakośa (न्यायकोशः) - M.M. Bhīmācārya Jhalakīkar & Revised and Re-Edited by M. M. Vāsudev Shāstrī Abhyankar, BORI, Poona, 1978.

xxi. अद्वैत-ग्रन्थ-कोष: - Edited by P. N. Pattabhi Rama Sastri, Deva Vani Parisad, Calcutta, 27.08.2017(archive.org).

xxii. A concise Dictionary of Intion philosophy (Sanskrit Terms sehined in English.) - John Grimes, State University of New York, New York, 1989.

इत्यादयः कोशग्रन्थाः।

अतः कालान्तरे आधुनिकानां पण्डितानां स्वकालधर्मानुसारेण स्वावश्यकतापूरणार्थं रचितानां नानाविधदर्शन-सम्पर्कितकोषग्रन्थानाम् आगमनेन दर्शनकोषशास्त्रपरम्परा नवीनकलेवरयुक्ता सुसमृद्धा च भवति इति विषये नास्ति सन्देहस्य लेशमात्रावकाशः। पुनश्च आधुनिकजगति दर्शनस्य नानाप्रकारकाधुनिकाभिधाननिर्माणे विद्वज्जनाः प्रचेष्टिताः भवन्ति। तेषामेतादृशी निरन्तरप्रचेष्टा अभिधानस्वरूपस्य एकाम् अनुपमां परम्परां सर्जयति।

तेषु कतिपयकोषग्रन्थानामैतिह्यं तथा तेषामनुशीलनम् –

1. Grimes, John. (1989). A Concise Dictionary of Indian Philosophy (Sanskrit Terms Defined in English.) — कोषशास्त्रविषयकं ग्रन्थोऽयं सर्वप्रथमं १९८९तमे वर्षे State University of New York इत्यतः प्रकाशितम्, ग्रन्थेऽस्मिन् विविधदर्शनसम्बन्धितशब्दानां तथा व्याकरणगतशब्दानां कोषनियमानुसारेण अकारानुक्रमेण सार्थोल्लेखः विद्यमानसन्दर्भेण साकं दृश्यते आङ्गलभाषायां संस्कृतभाषायां च। ग्रन्थकारेण समग्रकोषग्रन्थे प्रायः २३९६शब्दाः गृहीताः। तेन पृष्ठाङ्कनं कृतम् – (i – xii) + (1 - 440) इत्यनेन प्रकारेण। ग्रन्थस्य प्रारम्भिकभागे–

a. Preface

b. Scheme of Transliteration.

c. Scheme of Pronunciation.

इत्यादिक्रमेण विषयविभाजनमतिसंक्षेपेण दृश्यते।

अस्मिन् कोषग्रन्थे दर्शनविषयकशब्दानां नामानि अकारानुक्रमेण ग्रन्थकारेण प्रतिपाद्यन्ते। अत्र वेदादीनां विभाजनम्, नास्तिक-आस्तिकदर्शनयोः विभाजनम्, दर्शनसम्प्रदायानां विभाजनम्, योगाङ्गादीनां विभाजनम् इत्यादयः विषयाः दृश्यन्ते। ग्रन्थेषु कुत्रापि 'संकेतसूची' नास्ति । अत्र विषयसूचीपत्रमपि नास्ति, पुनः किमपि सहायकग्रन्थसूची नास्ति, अतः Grimes-महोदयस्य अत्र त्रुटि: परिलक्ष्यते किल। अस्य कोशस्य प्रथमशब्दः 'अबाधित' इति तथा अन्तिमशब्दः 'युक्तिदर्शन' इति। अत्र तु ग्रन्थस्य अन्तिमभागे ग्रन्थकारेण उपस्थापितम् –

Charts –

1) The Vedas.

2) Source - Books of Nāstika Systems.
3) Source - Books of Āstika Systems (i)
4) Source - Books of Āstika Systems (ii)
5) Source - Books of Schools of Śaivism.
6) Padārthas (Categories)
7) Vaiśeṣika Categories.
8) Jainism Categories.
9) Śaiva Siddhānta Tattva(S), Kashmir Śaivism Tattva(S)
10) Scheme of Viśiṣṭādvaita.
11) Jaina Epistemology.
12) Evolution of Prakṛti According to Sāṅkhya.
13) Cakra(s)
14) Aṅgasthala, Liṅgasthala.
15) An Index of Some Important Words.

इत्यनेन प्रकारेण Grimes-महोदयः सुन्दरमुपस्थापनं कृत्वा ग्रन्थोऽयं समाप्तः कृतः।

2. शुक्लः, डाँ. दीनानाथः .(१९६३). भारतीय-दर्शन-परिभाषा-कोषः — ग्रन्थोऽयं सर्वप्रथमं १९६३तमे वर्षे प्रतिभा-प्रकासनम् इत्यतः प्रकाशितम्। ग्रन्थेऽस्मिन् प्रारम्भिकभागे अनुक्रमणिका सम्यग्रुपेण ग्रन्थकारेण उपस्तापिता, प्रस्तावनांशे अस्मिन् कोशविषये सामान्यालोचना विद्यते। अत्र सम्पादकीय-वक्तव्यमपि लक्ष्यते। अत्र अकारादिक्रमेण कोषनियमानुसारेण आङ्गलभाषायां शब्दानां समावेशः दृश्यते। विद्यमानानां शब्दानां दार्शनिकमतानुसारेण व्याख्यानं विश्लेषनं च हिन्दीभाषायां ग्रन्थकारेण सप्रमाणं विशिष्टम् आलोचनं क्रियते। प्रायः ५९५शब्दाः ग्रन्थकारेण इत्यत्र गृहीताः। तेन पृष्टाङ्कनम्— (i – xii) + (१२-२६६) इत्यनेन प्रकारेण कृतम्। ग्रन्थेऽस्मिन् विद्यमान-शास्त्रीय-शब्दानां विशेषतया दर्शनशास्त्रदृष्ट्या व्याकरणशास्त्रदृष्ट्या च विशिष्टमालोचनं दृश्यते। अत्र दर्शनमिति विषये ग्रन्थकारेण आलोचितम्– दृश्यते प्रेक्ष्यते ज्ञायते अनेन इति दर्शनम् । अर्थात् येन माध्यमेन कस्यचित् वस्तुनः दर्शनं, ज्ञातुं, सम्मुखीकरणं च कर्तुं शक्यते, तत् दर्शनम् । दर्शनस्य लक्षणविषये तेन उक्तम्—

"यादभ्युदायकं चैव नैश्रेयसिकमेव च।
दर्शनं सुखप्राप्त्यर्थं मार्गं दर्शयति॥"[6]

उत्थानपतनज्ञानप्रदं तेषां प्राप्तिमार्गं प्रशस्तं दर्शयति च साधनं दर्शनम् इत्यर्थः। अतः शुक्लमहोदयस्य अत्र त्रुटि: परिलक्ष्यते किल। अस्य कोशस्य प्रथमशब्दः 'abbreviated syllogism' इति तथा अन्तिमशब्दः 'wrong' इति। रोमानकनीयलिप्यां शब्दानां संग्रहः विद्यते। ग्रन्थान्ते शुद्धिपत्रमपि अस्ति। अत्र एव सहायकग्रन्थसूची नास्ति। इत्यनेन प्रकारेण ज्ञानस्य प्रौढत्वेन ग्रन्थोऽयं समाप्तः।

3. पाण्डेयः, डाँ. मुरलीधरः. (१९९८). शाङ्करवेदान्तकोशः— कोषशास्त्रग्रन्थोऽयं सर्वप्रथमं १९९८तमे वर्षे सम्पूर्णानन्दविश्वविद्यालयतः प्रकाशितम्, ग्रन्थेऽस्मिन् विविधदर्शनसम्बन्धितशब्दानां तथा व्याकरणगतशब्दानां कोषनियमानुसारेण अकारानुक्रमेण सार्थोल्लेखः विद्यमानसन्दर्भेण साकं दृश्यते

संस्कृतभाषायाम्। ग्रन्थकारेण समग्रकोषग्रन्थे १२७७शब्दाः गृहीताः। तेन पृष्टाङ्कनं कृतम्– (१-४०) + (२-५०६) इत्यनेन प्रकारेण। ग्रन्थकारेण ग्रन्थस्य मध्ये– प्रस्तावना, आत्मनिवेदनम्, प्रास्ताविकम्, संकेताक्षरानुक्रमणिका, शब्दानुक्रमणी च इत्यनेन क्रमेण लिखितम्। प्रस्तावनायां विविधग्रन्थानां कोशकाराणां च नामानि प्राप्यन्ते। कोशकारः सम्पूर्णानन्दसंस्कृतविश्वविद्यालस्य कुलपतेः श्रीमण्डनमिश्रमहोदयस्य प्रति आत्मनिवेदनं कृतवान्। संकेताक्षरानुक्रमणिकायां ग्रन्थानां नामानि संकेताक्षरेण विद्यन्ते। शब्दानुक्रमणिकायां शब्दानां संग्रहः दृश्यते। अतः कोषग्रन्थे विद्यमानानां शब्दानां चर्चा जाता। अत्र दर्शनमिति विषये ग्रन्थकारेण आलोचितम्— "दर्शनम् — १. ब्रह्मसाक्षाकारः। यथा— आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (वृ. २।४।४)। श्रवणमननिदिध्यासनानि च ब्रह्मसाक्षात्काररूपदर्शनसाधनानि। श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः ज्ञात्वा च सततं ध्येय इति दर्शनहेतवः। २. तत्त्वज्ञानसाधनं शास्त्रं दर्शनम्। दर्शनं तत्त्वज्ञानमुपचाराच्च तत्त्वज्ञानसाधनेऽपि दर्शनशब्दः प्रयुज्यते। यथा— त्रयीदर्शनविपरीतेषु (प. पा. भाष्ये विपर्ययप्रकरणे) अत्र श्रीधरविरचितायां न्यायकन्दलीव्याख्यायाम्— दृश्यते स्वर्गापवर्गसाधनभूतोऽर्थोऽनया इति दर्शनम्, त्रयी एव दर्शनं त्रयीदर्शनम्। एतच्च दर्शनं द्विविधम् श्रुतिसापेक्षं श्रुतिनिरपेक्षं च। तत्रापि द्वैविध्यम्— श्रुतिसापेक्षाणि षट्, श्रुतिनिरपेक्षाणि च षट्। श्रुतिसापेक्षाणि— न्यायवैशेषिकौ, साङ्ख्ययोगौ, पूर्वोत्तरमीमांसे। गोतमप्रणीतं न्यायदर्शनम्, कणादप्रणीतं वैशेषिकदर्शनम्, कपिलप्रणीतं साङ्ख्म्, पतञ्जलिप्रणीतं योगशास्त्रम्, महर्षिजैमिनिप्रवर्तितं द्वादशाध्यायात्मकं दर्शनं पूर्वमीमांसा महर्षिवेदव्यासप्रवर्तितं चतुरध्यायात्मकं ज्ञानकाण्डरूपं ब्रह्मसूत्रमुत्तरमीमांसा। एतदपि षडविधम्— मध्वापरनामपूर्णप्रज्ञप्रवर्तितं द्वैतवादि, श्रीच्छङ्कराचार्यसम्मतं निर्विशेषाद्वैतवादि, श्रीनिम्बार्काचार्यप्रवर्तितं द्वैताद्वैतवादि, श्रीमद्वल्लभाचार्यप्रवर्तितं शुद्धाद्वैतवादि, श्रीरामानुजाचार्यश्रीमद्रामानन्दाचार्यश्रीकण्ठाचार्यश्रीकराचार्याभिनवगुप्ताचार्याद्यभिमतं विशिष्टाद्वैतवादिदर्शनम्। श्रुतिनिरपेक्षाणि च षट्— माध्यमिकयोगाचार सौत्रान्तिकवैभाषिकरूपचतुर्भेदात्मकानि बौद्धदर्शनानि, आर्हतदर्शनम् (जैनदर्शनम्) चार्वाकदर्शनं च। पद्मपुराणे उ. ख. २०७ अ. सर्वदर्शनसंग्रहे च विशेषज्ञानार्थं द्रष्टव्यम्। २. ज्ञानम्। यथा इदं विश्वं मिथ्या दृश्यत्वाद् शुक्तिरजतवत्। ३. चक्षुरादीन्द्रिय-जन्यं ज्ञानम्। यथा घटं पश्यतीत्यादि"[7]।

अतः पाण्डेयमहोदयस्य कोषग्रन्थे उद्दङ्कनजनितत्रुटयः परिलक्ष्यन्ते किल। अस्य कोशस्य प्रथमशब्दः 'ॐ,औम्' तथा अन्तिमशब्दः 'ह्लादः' इति। इत्यनेन प्रकारेण कुशलताप्रदर्शनेन ग्रन्थोऽयं सम्पन्नः अभवत्।

निष्कर्षः— वैदिककाले केवलं धार्मिकविषयानामुल्लेखः नास्ति, अपि तु तत्त्वचिन्तनस्य, ज्ञानविज्ञानस्य च मूलाधारः अस्ति। भारतीयदार्शनिकपरम्परायाः बीजकालो भवति वैदिककालः। उपनिषदादारभ्य षड्दर्शनपर्यन्तं, सर्वं चिन्तनं वेदवाङ्मये प्रतिष्ठितम्। अतः दर्शनकोशः केवलमेव दर्शनविषयेषु एव सीमितः नास्ति। व्यापकार्थे दर्शनशब्दस्य अर्थज्ञानेन सह दार्शनिकचिन्तनस्य सौन्दर्यमपि वर्धयति। दर्शनकोश इत्यनेन धर्मस्य, राष्ट्रस्य, समाजशास्त्रस्य अत्यावश्यकपदानां, सिद्धान्तानां, सिद्धान्तकारानाञ्च विषये शास्त्रार्थवाक्येन सह वाक्यार्थस्यापि ज्ञानं वर्धते। दर्शनकोषण पाठकानां शास्त्रपाठे रुचिर्वर्धते।

Endnotes

1. हेमचन्द्राचार्यस्य अनेकार्थसंग्रहः, श्लोकसंख्या - ४१०
2. संस्कृत ओ प्राकृत शब्दकोष वा अभिधानेर इतिहास, पृ. 71
3. प्राचीन भारतेर संस्कृत साहित्य, पृ. 111
4. ऋग्वेदभाष्योपक्रमः, पृ. १६७
5. A History of Sanskrit Literature, P - 412
6. डॉ. दीनानाथशुक्लस्य भारतीय दर्शन परिभाषा कोश, पृ. १०६
7. डॉ. मुरलीधरपाण्डेयस्य शाङ्करवेदान्तकोशः, पृ. २२५

Bibliography

- Grimes, John. A concise Dictionary of Intion philosophy (Sanskrit Terms se-hined in English.). New York: State University of New York, 1989.
- Abhyankar, Kashinath Vasudev. A Dictionary of Sanskrit Grammar. Baroda: Oriental Institute, 1961.
- Katre, Sumitra Mangesh. Dictionary of Pāṇini (Volumes -1, 2,3). Pune: Deccan College PostGraduate and Research Institute, 1968.
- Mishra, Sashibhusan. Various Traditions in Sanskrit Grammar. Kolkata: Sanskrit Book Depot, 2023.
- Das, Bhagavan. योग-सूत्र-भाष्य-कोषः. Benaras: The Kashi Vidyapitha, 1998.
- त्रिपाठी, आचार्यकेदारनाथः. सांख्ययोगकोशः. वाराणसी: काशीहिन्दुविश्वविद्यालयः, १९७४.
- शुक्लः, डॉ. दीनानाथः. भारतीय-दर्शन-परिभाषा-कोशः. देहली: प्रतिभा प्रकासनम्, १९६३.
- पाण्डेयः, डॉ. मुरलीधरः. शाङ्करवेदान्तकोशः. वाराणसी: सम्पूर्णनन्दविश्वविद्यालयः, १९९८.
- नारङ्गः, सत्य-पालः. संस्कृत कोश-शास्त्र के विविध आयाम. नवदेहली: राष्ट्रिय-संस्कृत-संस्थानम्, १९९८.
- दाहालः, लोकमणिः. व्याकरणशास्त्रेतिहासः. दिल्ली: चौखाम्बाविद्याभवनम्, २००७.
- आप्टे, वामन-शिवरामः. संस्कृत-हिन्दी-कोश. दिल्ली: नागप्रकाशनम्, २००३.
- बन्द्योपाध्यायः, डॉ. उदयचन्द्रः , डॉ. अनिता. प्राचीन भारतेर संस्कृत साहित्य, कोलकाता: संस्कृत-बुक-डिपो, 2012.

E-source

- https://scholar.google.com
- https://archive.org/details/texts
- https://sa.wikisource.org

———